# वरुणः

वरुणः श्वेतपुष्पश्च तिक्तशाकः कुमारकः ।
श्वेतद्रुमः साधुवृक्षः तमालो मारुतापहः ॥ **(Rjn)**

Synonyms of varuna are sveta puspa, tikta saka, kumaraka, svetadruma, sadhuvrksa, tamala and marutapaha.

वरुणः पादपस्तिक्तस्त्रिपर्णो भ्रगरप्रियः ।
विल्वपत्रो वृत्तफलो बर्हपुष्पः कषायकः ॥ **(Si.ni)**

Synonyms of varuna are padapa, tiktaha, triparna, bhragarapriya, bilvapatra, vrttaphala, barhapuspa, kashayaka.

वर्ध्मविद्रधिवातघ्नो पित्तास्रकफनाशनः ।
बाधिर्यकर्णशूलघ्नो वरणो योनिदोषजित् ॥ **(Mdn)**

Varuna alleviates vardhma, vidradhi, vata, badhirya, karna sula, yoni dosha, destroys pitta, asra and kapha.

वरुणः पित्तलो भेदी श्लेष्मकृच्छ्रामामारुतान् ।
निहन्ति गुल्मवातास्रकृमींश्चोष्णोऽग्निदीपनः ॥
कषायो मधुरस्तिक्तः कटुको रुक्षको लघुः । **(Bpn)**

Varuna is kashaya, madhura, tikta, katu in rasa, ruksa and laghu in guna, usna in veerya, increases pitta, is bhedi, agni dipana, cures slesma, krcchra, ama, maruta, gulma, vata asra and krmi.

वरुणः शीतवातघ्नस्तिक्तो विद्रधिजन्तुजित् ।
तथा च कटुरुष्णश्च रक्तदोषहरः परः ॥ **(Dhn)**

Varuna is tikta in rasa, sita in veerya, alleviates vata, vidradhi, jantu, katu in rasa, usna in veerya, best in alleviating rakta dosha.

वरुणः कटुरुष्णश्च रक्तदोषहरः परः ।
शीर्षवातहरः स्निग्धो दीप्यो विद्रधिवातजित् ॥ **(Rjn)**

Varuna is katu in rasa, snigdha in guna, usna in veerya, dipya, alleviates rakta dosha, sirsa vata, vidradhi and vata.

वरुणोऽनिलशूलघ्नो भेदो चोष्णोऽश्मरीहरः ।
पुष्पं वरुणजं ग्राहि पित्तघ्नमामवातजित् ॥

वरुणोष्णः कटुः स्निग्धो दीपनो मधुरः स्मृतः ।
लघुस्तिक्तस्तु तुवरः पित्तलो भेदकः स्मृतः ॥
वातं कफं विद्रधिंच मूत्रकृच्छ्रं च नाशयेत् ।
अश्मरीं वातरक्तं च गुल्मं रक्तरुजं कृमीन् ॥
रक्तदोषं शीर्षवातं मूत्रधातं च हृद्रुजम् ।

हृद्रोगं नाशयत्येव पुष्पं चास्य च ग्राहकम् ॥
रक्तदोषहरं चैव फलं चास्य सरं गुरुः ।
पाके तु मधुरं स्वादु स्निग्धोष्णं वातनाशकम् ॥
पित्तं कफं नाशयतीत्येवं च मुनिभिर्मतम् । **(Nir)**

Varuna is usna in veerya, bhedi, alleviates anila,sula and asmari. Puspa is grahi, alleviates pitta and ama vata.

Varuna is katu, madhura, tikta, tuvara in rasa, snigdha, laghu in guna, usna in veerya, dipana, bhedaka, increases pitta, cures vata, kapha, vidradhi, mutrakrcchra, asmari, vatarakta, gulma, rakta vikara, krmi, rakta dosha, sirsa vata, mutraghata, hrdruja and hrdroga.

Puspa is grahi, and alleviates rakta dosha.

Phala is svadu in rasa, snigdha, sara, guru in guna, usna in veerya, madhura in paka, destroys vata, pacifies pitta and kapha.

वरुणो मधुरस्तिक्तः कषायकटुको लघुः ।
रूक्षोष्णः पित्तलो भेदी दीपनः कफवातजित् ॥
निहन्ति कृमिवातास्रमूत्रघातास्रहृद्गदान् ।

पुष्पं पीतास्रहृद्ग्राहि फलं स्निग्धं सरं गुरु ।
स्वादूष्णं मधुरं पाके वातघ्नं कफपित्तजित् ॥ **(Kdn)**

Varuna is madhura, tikta, kashaya, katu in rasa, laghu, ruksa in guna, usna in veerya, is bhedi, dipana, increases pitta, alleviates kapha, vata, cures krmi, vata asra, mutraghata, asra vikara and hrd gada.

Puspa is grahi and alleviates pitta, asra.

Phala is svadu in rasa, snigdha, sara, guru in guna, usna in veerya, madhura in paka, alleviates vata, kapha and pitta.